नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

# १७ चन्द्रप्रज्ञप्तिउपाङ्गसूत्रम्

## सटीकं

## षष्ठं उपाङ्गम्

(मूलसूत्रम् + मलयगिरि आचार्येण विरचिता वृत्तिः)

— ચંદ્ર પ્રજ્ઞપ્તિ ઉપાંગસૂત્રની ટીકાના આરંભે કંઈક —

(૧) વર્તમાન કાળે ઉપલબ્ધ સૂર્યપ્રજ્ઞપ્તિ અને ચંદ્ર પ્રજ્ઞપ્તિ બંને ઉપાંગસૂત્રોના પ્રાભૃતો —પ્રાભૃત પ્રાભૃતો — સૂત્ર આદિ સર્વે, સંખ્યા અને વિષયવસ્તુની દૃષ્ટિએ સંપુર્ણ સામ્ય ધરાવે છે

(૨) આવાં જ કોઈ કારણથી આગમોદ્ધારક આચાર્યશ્રી આનંદસાગરસૂરીશ્વરજી મહારાજાએ બધાં જ ઉપાંગ સૂત્રો ટીકાસહિત પ્રકાશીત કરાવ્યા ત્યારે ચંદ્રપ્રજ્ઞપ્તિ—ટીકાપ્રકાશીત કરાવી નથી ત્યાર પછીના સંશોધક પૂજ્યશ્રીમાંના કોઈએ પણ શ્રી મલયગિરિજી કૃત ચંદ્ર પ્રજ્ઞપ્તિ ટીકાનું પ્રકાશન કરાવેલ નથી

(૩) મેં મૂળ આગમ સૂત્રો પ્રકાશીત કરાવ્યા ત્યારે ચંદ્ર પ્રજ્ઞપ્તિ સૂત્ર આખું છપાવેલ છે પણ આરંભની ચારગાથા જ અતિરિક્ત હોવાથી ૪૫—આગમના અનુવાદમાં ફક્ત આ ચાર ગાથાનો જ અનુવાદ કર્યો છે તે જ રીતે અહીં પણ આ ચાર ગાથાની જ મલયગિરિજી કૃત ટીકા છપાવેલ છે

### —: હસ્ત લિખિત પ્રત :—

૪૫ આગમ સટીકના સંશોધન કાર્ય સમયે મેં ચંદ્રપ્રજ્ઞપ્તિની મલયગિરિજી કૃત ટીકા મેળવવા પ્રયાસો કર્યા અંતે લા૦ દ૦ ઈન્સ્ટીટ્યુટ ઓફ ઈન્ડોલોજીમાંથી તે મળી. આ પ્રત ૨૨૪૯ સે. મિ. ની છે જે ''મુનિ માણેક''ની પ્રેરણાથી બોરસદ મુકામે પટેલ નાથાભાઈ સનાભાઈ નામક લહીયા એ સંવત ૧૮૫૬માં કારતક વદ—૭—ના પૂર્ણ કરી છે, તેના કુલ ૨૬૨ પૃષ્ઠો છે

મારા સંશોધન મુજબ આરંભની ચાર ગાથા જે ચંદ્ર પ્રજ્ઞપ્તિમાં છે તેની મલયગિરિજી કૃત ટીકા પણ છે તે અહીં લીધી છે અને પ્રશસ્તિ ગાથામાં એક ગાથા

वीर वरस्स० ''સુર્યપ્રજ્ઞપ્તિ ઉપાંગમાં છે તે ચંદ્રપ્રજ્ઞપ્તિની આ ટીકામાં જોવા મળેલ નથી બાકી બધું જ સામ્ય ધરાવે છે

ક્વચિત્ પાઠાંતર જોવા મળેલા છે તે સામાન્ય છે

इति अलम् - मुनि दीपरत्नसागर

## प्राभृतं – १

वृ० अर्हम् । श्री वर्धमानाय नमः

॥ १ ॥ मुक्ता फलमिव करत कलितं, विश्वे समस्त मपि सततं योवेत्ति,
विगत कर्म्म सङ्ग, यति नाथो जिनो वीरः ॥
॥ २ ॥ सर्वश्रुत पारगताः प्रतिहत निःशेष कुपथ संतानाः ।
जगदेव तिलक भद्रा, जयंति गणधारिणः ॥
॥ ३ ॥ विलसउ मनसिस दामे जिनवाणि परम कल्पलतिकेव
कल्पित सकल नरामर, शिवसुखफलदानतर्ललिता ॥
चंद्रप्रज्ञप्तिमहं गुरुपदेशनुसारतः किञ्चित् ।
विवृणोमि यथाशक्ति स्पष्टं स्वपरोपकाराय ॥

[ तत्राविघ्नेनेष्टप्रसिध्यर्थ–मादाविष्ट देवता स्तवमाहं ]

### –ः प्राभृतं – १ – प्राभृत प्राभृतं – १ ः–

[नमो अरिहंताणं]

**मू. (१)** जयति नवनलिन कुवलय -- वियसियसयवत्तपत्तलदलच्छो
*वीरो गयंदमयगल सललियगय विक्कमो भयवं*

**वृ.** इतस्तवो द्विधा । गुणोकिर्तनरूपः प्रणामरूपश्च, तत्र गुणोत्कीर्तनरूपः साक्षादनयागाथयाऽभिहितः, प्रणामरूपः सामर्थ्य गमी । यथा च सामर्थ्यगम्यता तथा भावयिष्यते । तत्र जयति रागादि शत्रुनभिभवति, ''जिञ्जिश्चभिभवे इति वचनात्'' यद्यपि चन संप्रति रागादि शत्रूनभिभवति तेषामग्रे एव निर्मूलका षंकषितत्त्वात् तथापि तत्कलसिद्धय लक्षणा मथाप्यविच्युतमवतिष्ठति इति फले हेतूपचारा जयति इति तं यदिवा संप्रत्यपि ''भगवानुभक्त्यानुध्यायमानोध्यात्रणामभिभवति रागादि क्लेशान् भत्तइ जिनवराणं खिय्येति पुव्वसञ्चिया कम्मा इति'' वचनात् ततो क्षयति इति फलं अथवा क्षयति सर्वानपि सुरासुरप्रभृतीन् प्राणिनः स्वगुणैरति शेते धातूनामनेकार्थत्वात्, यश्च सकल सुरासुरेभ्योपि स्वगुणैरतिशायी सप्रेक्षावतामवश्यं प्रणामार्हो गुणैरधिकत्वात् ततो जयति किमुक्तं भवति तं प्रतिपणतोस्मि इति यतेन प्रणामरूपस्तवः सामर्थ्यगम्यो भावितः- कोसावित्याह''

वीरः शूरवीर विक्रान्तौ वीरयतिस्म कषायादि शत्रून् प्रति विक्रामति स्मेति वीरः । इदं च वीर इति नामनयादृच्छिकं किंतु यथावस्थितमन्येन साधारणं परीषहोपसर्गादि विषयं तिर्यञ्चमपि

च सुरासुरकृतं, अतो वीर इति नाम्नाश्वपायापगम अतिशयोध्वन्यते, अथवा "ईर गति प्रेरणयोः" विशेषेणाऽपुनर्भाव स्वरूपेण ईरयति–प्रेरयति आत्मनः सकाशाद्यावयति याति च शिवमिति वीरः । अत्राप्यपायागमातिशय प्रतिपत्तिः

किं विशिष्टं इति आह – नवनलिन इत्यादि । प्राकृते पूर्व निपातो विशेषणनाम तत्र इति। पत्तल शब्दो, वियसिय शब्दश्च नलिनादि शब्दानां पूर्वं द्रष्टव्यः, पत्तलमिति पत्र समृद्धं, पत्तलमिश्चं तिरकं पत्तलम् इति वचनात् वत्वं प्रत्यग्रं । विकसितं व्याकोशीभूतम् तं च ईषच्चेतंविदु, पद्ममीषमीलमथो उत्पलं इषद् क्तं तु नलिनम् इत्यादि पद्मं, कुवलयं नीलोत्पलं शतपत्रं पत्र शतं संख्योपेतं पद्ममेव, तेषां दलं पत्रं तद्वत् दीर्घमनोहारिणीवाऽक्षिणि यस्य स तथा पुनः कथंभूत इत्याह -

गजेन्द्र मदकलसलिनगतविक्रमः – अत्रापि मदकल शब्द स्पष्ट विशेषण भूतस्य विशेष्यात्परः निपातः प्राकृतत्वात् मदकलो मदमभिगृह्णानस्तरुणो गजो, गजानामिन्द्रो गजेन्द्रः शेष गजेभ्यो गुणैरधिकतरत्वात् मदकलश्चासौ गजेन्द्रश्च मदकलगजेन्द्रस्तस्येव ललितो मनोज्ञ लीलया सहितो गतरूपो गमनरूपो विक्रमोयस्य स तथा पुनः कथम्भूत इत्याह–

भगवान् भगः समग्रैश्वर्यादिरूपः उक्तं च ऐश्वर्यस्य समग्रस्य रूपस्यरासः श्रियः, धर्म्मस्याथ प्रयत्न स्पषृस्यां भग इतींगता भगोऽस्यास्तीति भगवान् । अनेन ज्ञानातिशयोवागतिशयः पूजातिशयोश्चोक्तस्तत्रैश्वर्यवाचित्व विवक्षायां पूजातिशयः प्रयत्नवाचित्वविवक्षायां वागतिशयश्च प्रवर्तते न च ज्ञानातिशयमंतरेण तथारूपो वागतिशयः पूजातिशयश्चात्र वर्तते । आभ्यां ज्ञानातिशयोप्याक्षिप्यते एते च ज्ञानातिशयादयश्चत्वारोप्यतिशया देह सौगन्ध्यादिनामतिशयानाम् उपलक्षणंतानंतरेणैतेषाम् सम्भवात्, ततः चतुस्त्रिंशदतिशयोपेतो भगवान् वीरो । जयतीतीत्फलं द्रष्टव्यं, तदेवं वर्तमाने तीर्थाधिपते वर्द्धमानस्वामिनो नमस्कारामिधाय संप्रति सामान्यतः पञ्चानामपि परमेष्ठिनां नमस्कारमाह–

**मू. (२)** *नमिऊण असुरसुर – गरुल भूयगपरिवंदिए गय किलेशे ।*
*अरिहे सिद्धायरिए उवज्झाए सव्वसाहूय ॥*

**वृ** असुर–सुर–गरुड–भूयग वन्दितान् – अर्हन्ति त्रिदशकृतां समवसरणादि रूपां पूजामित्यर्हतस्तीर्थकृतस्तान्, तथासिद्धान् अपगत् सकल कर्म्ममलात्, आचार्यान् पञ्चविध ज्ञानाद्याचार स्वयं परिपालयन् परोपदेशदान सतत प्रवृतान्, उपाध्यायन् यथाशक्ति द्वादशाङ्ग स्वयमध्ययनपराध्यापन निजसुमानसान्, साधून् ज्ञानादिक्रियाभिः मुक्तिसाधन प्रवणान् नत्वा नमस्कृत्या किमित्याह--

**मू. (३)** *फुडवियड पागडत्थं वोच्छं पुव्व सुयसारणी संदं ।*
*सुहुमगणि नोवदिट्ठं जोइसगणराय पन्नतिं ॥*

**वृ.** स्फुट यथावस्थितो निर्मलबोध विषयो, विकटो विस्तीर्णः सूक्ष्मतर बुद्धिगम्य इत्यर्थः, प्रकटः साक्षादशेरेषूपरिस्फुरन्निवार्थो यस्यांसा तथा तां पूर्वश्रुतसार निस्पंदं, पूर्वगत श्रुते सार निस्पंदभूतानामेतेन पूर्व्वेभ्या इयं चन्द्रप्रज्ञप्तिरुद्धृ तेत्यावेदितं । इयं च न पूर्वाणि स्वयमधीत्यतत उध्धृता किं गुरूपदेशान्सारतस्तत आह सूक्ष्मगएकपदिष्ठां सूक्ष्मः, सूक्ष्ममिति परिकलितो गणि आचार्यो, गणोऽस्यास्ति इति व्यक्तेस्तेनोपदिष्टां यथा पूर्वाणि गुरवेण व्याख्यातानि तथा तेभ्योध्धृतेति

भाव: ज्योतिषि ग्रह नक्षत्रतारकाणि तेषां गणः समूहस्तस्य राजाधिपतिर्ज्योतिर्गण राजश्चन्द्रस्तस्य प्रज्ञप्तिं। प्रज्ञप्यते प्ररूप्यन्ते अनयेति प्रज्ञप्तिर्यथावस्थित तत् स्वरूप प्रतिपादिका वचनसंततिस्तां वक्ष्येप्रतिपादयिष्यामि तत्र पूर्वेषु चंद्रादि वक्तव्यता।

**मू. (४)** *"नामेण इंदभूतीत्ति गोतमो वंदिऊण तिविहेणं।*
*पुच्छइ जिनवरवसहं जोइसगणराय पन्नर्ति ॥*

**वृ.** प्रथमतो गौतमप्रश्नोपेक्षेवमावेदयति। यो नाम्ना जगति इन्द्रभूतिरिति प्रसिद्धो, गौतमो गोत्तम गोत्रः, स भगवंतं जिनवर वृषमं वर्द्धमानस्वामिनमस्य स्व समीपे तत्प्रश्नासंभवात् त्रिविधेन च मनसा वाचा कायेन च वन्दित्वा – नमस्कृत्य, ज्योतिषराजस्य चन्द्रमस उपलक्षणमेतत् सूर्यादिश्च प्रज्ञप्तेप्ररूप्यते इति प्रज्ञप्तिश्चन्द्रादीनां यथावस्थिता स्वरूपस्थितस्तां सम्पृच्छतीति। शिष्यस्य प्रश्नावकाशमाशङ्क्य प्रथमतो प्रथमतो प्राभृतेषु यदक्तवयं तदुपक्षिपन् गाथा पञ्चकमाह–

**નોંધઃ**—અહીંથી સૂર્યપ્રજ્ઞપ્તિ અને ચંદ્રપ્રજ્ઞપ્તિની ટીકા સમાન છે કૃપયા અમારું સંશોધિત સમ્પાદિત "सूर्यप्रज्ञप्ति सटीकं – उपांगसूत्र–१६ જોવા વિનંતી"

**मुनि दीपरत्न सागर**

ચંદ્રપ્રજ્ઞપ્તિસૂત્ર "મૂળ" અનુક્રમ ૫ થી ૧૯ સૂર્યપ્રજ્ઞપ્તિસૂત્ર "મૂળ" અનુક્રમ ૩થી ૧૭ મુજબ જ છે.

ચંદ્રપ્રજ્ઞપ્તિસૂત્ર "મૂળ" અનુક્રમ ૨૦–૨૧ સૂર્યપ્રજ્ઞપ્તિ "મૂળ" અનુક્રમ ૧–૨ – પ્રમાણે છે

ચંદ્રપ્રજ્ઞપ્તિ સૂત્ર "મૂળ" અનુક્રમ ૨૨ થી ૨૧૧, સૂર્ય પ્રજ્ઞપ્તિ "મૂળ" અનુક્રમ ૧૮ થી ૨૦૭ મુજબ છે

ક્રમાંક તફાવત સિવાય સૂત્ર અને ટીકામાં સામ્ય જ છે

* * *